पञ्चमः पाठः

# पञ्चमहाभूतानि

पञ्चमहाभूतात्मकमिदं सर्वं जगत्। अस्माकं शरीरमपि तन्मयमेव। कानि च तानि ? इति जिज्ञासायाम् अन्नम्भट्टरचितात् तर्कसङ्ग्रहात् एतेषां लक्षणानि बालबोधनार्थं संवादात्मकेऽस्मिन् पाठे प्रदीयन्ते।

(कक्षायाम् आचार्यस्य आगमने सर्वे छात्राः तमभिवाद्य उपविशन्ति।)

**प्रियङ्का** - श्रीमन् ह्यः सायङ्काले प्रतिवेशिनः गृहे जायमाने प्रवचनकार्यक्रमे प्रवचनकारेण गोस्वामिनः तुलसीदासस्य उक्तिम् उद्धरता कथितम् यत् अस्माकमिदं शरीरं पञ्चमहाभूतैः निर्मितं भवति। किम् एतत् सत्यम् ?

**आचार्यः** - त्वं न जानासि ? सत्यमेव, अस्माकं शरीरं पञ्चमहाभूतैः एव विनिर्मितम्।

**पङ्कजः** - कानि सन्ति पञ्चमहाभूतानि ? गुरुवर्य !

**आचार्यः** - शृणोतु, पृथिव्यप्तेजोवाय्वाकाशानि पञ्चमहाभूतानि। पृथिवी आपः तेजः वायुः आकाशञ्चेति, एभिः युक्तमेतत् शरीरम्।

**निवेदिता** - किम् अस्माकं शरीरे एतानि सन्ति ? पृथिव्याः रूपं मृत्तिकापाषाणादिमयम्। शरीरे तु एतत् नावलोक्यते।

**आचार्यः** - आकर्णयतु, एतानि स्थूलरूपेण न, अपितु गुणरूपेण विद्यन्ते। शरीरे पञ्च ज्ञानेन्द्रियाणि वर्तन्ते श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेन्द्रियाणि। अत्र एतेषां गुणाः अनुभूयन्ते। शृणु, तावत् पृथिव्याः लक्षणम् - तत्र गन्धवती पृथिवी। घ्राणग्राह्यो गुणः गन्धः। एवं घ्राणेन्द्रियं पृथिव्याः सूक्ष्मस्वरूपम्।

**सञ्जीवः** - आपः जलमेव किम् ?

**आचार्यः** - आम् ! तस्य लक्षणमस्ति - शीतस्पर्शवत्य आपः। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। रसनाग्राह्यो गुणः रसः। रसनेन्द्रिये जलस्य गुणः वर्तते।

**उर्वी** - तेजसः लक्षणं किम् ? गुरुदेव !

**आचार्यः** - उष्णस्पर्शवत्तेजः। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। चक्षुर्मात्रग्राह्यः गुणः रूपम्। चक्षुरिन्द्रिये रूपग्रहणशालिता तस्मादेव।

**शिवेन्दुः** - आचार्य ! कस्मिन् इन्द्रिये वायोः लक्षणं लक्ष्यते ?

**आचार्यः** - शृणोतु, पूर्वं वायोः लक्षणम् - रूपरहितस्पर्शवान्वायुः। इन्द्रियं स्पर्शग्राहकं त्वक्, सर्वशरीरवर्ति। त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। एवं त्वगिन्द्रिये वायोः लक्षणमस्माभिः अनुभूयते।

**कामिनी** - अवगतं श्रीमन् ! परं आकाशस्य तत्त्वं शरीरे केन रूपेण विद्यते ?

**आचार्यः** - 'शब्दगुणकम् आकाशम्' इति तस्य लक्षणम्। शब्दस्तु श्रोत्रेण गृह्यते। श्रोतृग्राह्यो गुणः शब्दः। श्रोत्रेन्द्रिये आकाशत्वं विद्यते। एवमस्माकं शरीरे एतेषां पञ्चमहाभूतानि तत्त्वानि सूक्ष्मरूपेण वर्तमानानि सन्ति।

(अतः परं घण्टिकानादं श्रुत्वा छात्राः कक्षातः बहिर्निर्गताः)

## शब्दार्थः

अभिवाद्य - अभिवादनं कृत्वा। उपविशन्ति - तिष्ठन्ति। जायमाने - सम्पद्यमाने। भूतानि - क्षितिजलादिपञ्चतत्त्वानि। आपः - जलम्। अवलोक्यते - दृश्यते। आकर्णयतु - शृणोतु। विद्यन्ते - विद्यमानाः सन्ति। श्रोत्रम् - कर्णम्। त्वक् - त्वचा। चक्षुः - नेत्रम्। जिह्वा - रसना। घ्राणेन्द्रियः - नासिका। शीतस्पर्शः - शीतलः स्पर्शः। उष्णः - तापपूर्णः। वायोः - पवनस्य। अनुभूयते - अनुभवं क्रियते। अवगतम् - ज्ञातम्।

## अभ्यासः

1. **एकपदेन उत्तरत -**

(क) का गन्धवती ?
(ख) आकाशतत्त्वं शरीरे केन रूपेण विद्यते ?
(ग) उष्णस्पर्शवत् किम् ?
(घ) आपः गुणः कः ?
(ङ) त्वगिन्द्रिये कस्य गुणः वर्तते ?

2. **एकवाक्येन उत्तरत -**

(क) कस्य गृहे प्रवचनकार्यक्रमः आसीत् ?
(ख) प्रवचनकारेण कस्य उक्ति उद्धृता ?
(ग) कानि पञ्चमहाभूतानि ?
(घ) शरीरे कति ज्ञानेन्द्रियाणि सन्ति ? नामानि लिखत ?
(ङ) शिवेन्दुः आचार्यं किम् अपृच्छत् ?

3. **रिक्तस्थानानि पूरयत -**

(क) घ्राणेन्द्रियं .................................... शरीरम्।
(ख) रसनाग्राह्यो गुणः .................................... ।
(ग) इन्द्रियं रूपग्राहकं ........................................ ।
(घ) श्रोत्रेन्द्रिये .................................... विद्यते।
(ङ) स्पर्शग्राहकं ............................... ।

4. **युग्ममेलनं कुरुत -**

**(क)**

| 'अ' | 'आ' |
|---|---|
| पृथिवी | रूपः |
| आपः | शब्दः |
| आकाशम् | रसः |
| वायुः | स्पर्शः |
| तेजः | गन्धः |

**(ख)**

| 'अ' | 'आ' |
|---|---|
| गन्धः | श्रोत्रम् |
| रसः | त्वक् |
| रूपः | चक्षुः |
| स्पर्शः | जिह्वा |
| शब्दः | घ्राणम् |

5. **अधोलिखितपदानां विभक्तिं वचनं च लिखत -**

सायङ्काले, अस्माकम्, एभिः, पृथिव्याः, तस्मात्, रूपेण

6. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| जानासि | | | | |
| आकर्णयतु | | | | |
| विद्यन्ते | | | | |
| वर्तते | | | | |
| शृणोतु | | | | |
| शृणु | | | | |

7. **प्रकृतिप्रत्ययौ पृथक् कुरुत -**

कथितम्, अवगतम्, निर्मितम्, श्रुत्वा, निर्गताः

8. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

आकाशञ्चेति, पाषाणादि, ज्ञानेन्द्रियाणि, ताराग्रवर्ति, त्वगिन्द्रियम्

9. **अधोलिखितानाम् अव्ययानां वाक्येषु प्रयोगं कुरुत -**

अत्र, एवम्, तत्र, एव

## योग्यताविस्तारः –

- पञ्चमहाभूतानां प्रदर्शनाय पञ्चशाखासमन्वितस्य जगद्रूपवृक्षस्य चित्ररचनां कुरुत।